Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 5 | ISSN : 2582-0095

# ब्राह्मणग्रन्थस्य वैशिष्ट्यम्



डाँ राजकिशोर मिश्रः
सहायक प्राध्यापकः/वेद विभागः
बाबा साहेब राम संस्कृत महाविद्यालयः,
पचाढी, दरभंगा

सारांशः - तत्र विधीनामेव विधानम् स्वीकार्यम् विधि विषयं तु स्पष्टरूपेणापादितम्। परन्तु हेतु निर्वचननिन्दादि उदाहरण नोपस्थापितम्। यतो हि कात्यायनेनापि''विधिर्निन्दा प्रशंसाSध्यात्ममधिदेवतमधिभूतमनुवचनं परकृतिःपुराकल्पःसृष्टिरिति व्राहमणम्''उक्तवान् [i] हेतु- तेन ह्यन्नं क्रियते'' [ii] निर्वचनम्-''इन्धे ह वा एतदध्वर्युरिध्मेनाग्निम्''तस्मादिध्मो नाम [iii] निन्दा -''तदु ह स्माहापि बकुर्वाष्णौ माषान्मे पचत न वा एतेषां हविर्गृणन्तीति तदु तथा न कुर्यात्'' [iv] प्रशंसा अग्निर्वै देवानाम्मृदुहृदयतमः। यं वै मृदुहृदयतमं मन्येत तमुपधावेत्।तस्मादग्नय एव [v] संशय-''स यदि पुरा मानुषी वाचं व्याहरेत्'' [vi] विधिःस एष उभयत्राच्युत आग्नेयोSष्टाकपालःपुराडाशो भवति[vii] पराकृतिः- (परक्रिया)'' पुरुषो ह नारायणोSकामयत''[viii] पुराकल्पः ''एतेन हेन्द्रातो दैवापःशौनको जनमेजयं पारिक्षितं याजयाञ्चकार'' [ix] व्यवधारणकल्पना-स दानमेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैतत् परिगृह्णाति''[x]उपमान तदु हापि पाञ्चित्र्यंगुलामेव सौम्यस्याध्वरस्य वेदि चक्रे [xi]कात्यायन मते तु उक्तेषु विध्यादिषु पञ्चैवव संगृहीतं वर्तते ते च विधि निन्दा प्रशंसा परकृति पुराकल्प अनन्तरं षड् अव- शिष्टाः सन्ति ते च अध्यात्मम् अधियज्ञम् अधिदेवतम् अधिभूतम् अनुवचनम् सृष्टिः एषु यथाक्रमेणोदाहरामि-अध्यात्मम्-अथाध्यात्मम् प्राणो वा अर्कः। तस्यान्न्मेव कम् अन्नं हि प्राणाय कर्म इति नु एवार्कस्य [xii]अधियज्ञम्-अथाधियज्ञम् यदेवाग्नावन्नमुपधीयते तदन्नम्।या आपस्तत्पानम्।परिश्रित एव श्रीः [xiii] अधिदेवतम्-''अथाधिदेवतम् या वै सा वागग्निरेव सः। यत्तच्चक्षुःअसौ स आदित्यः[xiv] अधिभूतम्-''तस्मादाहुर्यावती वेदिस्तावती पृथीवीति''[xv] अथवा''अयं वाव लोक एषोSग्निश्चितः।तस्याप एव परिश्रितःइत्याद्यभिधायन्ते''एनं भूतमेतत्सर्वमभिसम्पद्यते''[xvi] अनुवचनम्-''अग्निर्वै हिमस्य भेषजम्''[xvii] सृष्टिः-''असद्वा इदमग्र आसीत्''इत्यादि [xviii] वाचस्पतिमिश्रेण नैरुक्तं यस्य मन्त्रस्य विनियोगःप्रयोजनम्।प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते इत्येवं याज्ञवल्क्यस्य ब्राह्मणस्य तु लक्षणम्''प्रत्यभिज्ञापितम्।यथा अथाभ्यद्यय जपति''-''सूर्यस्त्वापुरस्तात्पातु कस्याश्चिदभिशस्त्यै'' [xix] गुप्त्यै वाSअभितःपरिधयो भवंति।अथैतत्सूर्यमेव पुरस्ताद्गोप्तारं करोति नेत्पुरस्तान्नाष्ट्रा रक्षांस्यभ्यवचरानिति।सूर्यो हि नाष्ट्राणां रक्षसामपहन्ता'' [xx] वृहदारण्यकोपनिषदि वाचस्पत्यमिश्रेणव्यारव्यानावसरे ब्राह्मण लक्षणमुच्यते इतिहासःपुराणं विद्या उपनिषदःश्लोकाःसूत्राण्यनु-व्यारव्यानानि[xxi]इतिहासः-मनवे हवै प्रातरवनेग्यमुदकमाजहुः यथेदं पाणिभ्यामवनेजनायाहरन्ति एवम्।तस्यावनेनिजानस्य मत्स्यःपाणि आपेदे''[xxii]पुराणम्-''असद्वा इदमग्र आसीत्''[xxiii] विद्या-देवयजनविद्या वेदःसोSयमिति'' [xxiv] उपनिषदःप्रियमित्येनदुपासीत'' [xxv] श्लेकाःब्राह्मणप्रभवाःमन्त्राःतदप्येते श्लोकाःअणुःपंथा वितरः'' [xxvi] सूत्राणि-वस्तुसंग्राहकवाक्यानि वेदे आत्मत्येवोपासीत'' [xxvii] अनुव्यारव्यानानि मन्त्रविवरणानि अपर रूपेण वस्तुसंग्राहकवाक्यानां विवरणवाक्यानि-''सत्यं चैवानृतं च सत्यमेव देवाःअनृतं

मनुष्याः[xxviii] व्याख्यानानि अर्थवादाःअथवा मेधया हि तपसाSजनयत्पिता"[xxix] इत्यादीनि मन्त्रविवरणानि। उपरि उल्लिखिताःत्रिविधा एव अस्मिन् ब्राह्मणे शैली लक्ष्यते।

मुख्यशब्दः- विधि, देवाः, अर्थवादाः, ब्राह्मणे शैली, पुराणम्, ब्राह्मणग्रन्थस्य

बृंहि बृद्धौ  इत्यस्माद्धातोः"वृंहेर्नोSच्च"[xxx] इत्यनेन धातोर्नुमःइत्यस्य स्थाने अकारादेशे तथा मनिन् प्रत्यये यणि कृते सति ब्रह्मन् इति शब्दः।शतपथब्राह्मणोद्धरणतया ब्रह्मेति शब्देन मन्त्रः संगृहोतो भवति यतो हि ब्रह्म वै मन्त्रः"[xxxi] इति विधानात् ।अमरकोषे तु-"वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रःप्रजापतिः"[xxxii]अत्र ब्रह्म शब्देन ग्रन्थः एव स्वीकृतो भवति। मेदिनीकोषोद्धरणे-"ब्रह्म तत्त्वतपोवेदे न द्वयोःपुंसि वेधसि ।ऋत्विग्योगभिदोर्विप्रे चाध्यात्मज्ञानयोस्तथा"[xxxiii] कोषादिषु ग्रन्थेषु निष्पादनमुक्तरीत्यैव वर्तते। तत्र अन्यत्र स्थलस्योद्धरणं यथा वर्तते- "तस्मादेतदु ब्रह्म नाम रुपमन्त्रञ्च जायते स्मृतिः[xxxiv]। ब्रह्म शब्दात् "तदधीते तद्वेद इत्यनेन ब्रह्म वेदं शुद्धं चेतन्यं वेत्त्यधीते वा अर्थे अण् प्रत्यये आद्यचःवृद्धौ कार्ये सति ब्राह्मण- मिति निष्पद्यते ।पुनश्च तेन प्रोक्तम् इत्यर्थे  ब्रह्मणा प्रोक्तम् इति विग्रहे ब्राह्मण शब्दस्य निष्पादने नासंगतिः। किन्तु ब्रह्मणः मुखजातत्वात् ब्रह्मणोँSपत्यम् इति विग्रहे अण् सति न तावत् ग्रन्थवाचको सिद्ध्यति।ब्राह्मण शब्दसमीक्षणविषये "शेषे"[xxxv] इत्यनेन ब्रह्म जानतीति विग्रहे अण् प्रत्ययेSपि निष्पादनं दृश्यते।ब्राह्मण शब्दस्य निष्पादनं द्वयोःलिङ्गयोः विद्यते। उभयोर्मध्ये यत् पार्थम्यं सःस्पष्टरुपेण प्रतिभाति कोषादिग्रन्थमाध्यमेन।यथा आहुःमेदिनीकाराः"ब्राह्मणं ब्रह्मसंघाते वेदभागे नपुंसकम् इति,अर्थात् नपुंसकलिगे अस्य ब्राह्मणशब्दस्य ग्रहं वर्तते स तु वेदात्मकःग्रन्थवाची,परन्तु पुंल्लिंगे व्यवहृतोब्राह्मण शब्दःजातिवाचकःइति ।अत एव ग्रन्थवाचिनो यो ब्राह्मणशब्दः तस्मिन् विषये उक्तिःअतिप्रसिद्धो वर्तते ब्रह्माणि नाम मन्त्रा संहन्यन्ते स्पष्टीक्रियन्ते व्याख्यायन्ते वा यस्मिंस्तादृशे वेदभागे  ब्राह्मणशब्द इत्यर्थः।अत एव यथा वेदशब्दो ग्रन्थवचनस्तथैव ब्राह्मणशब्दोSप्येतत्प्रतिपादक ग्रन्थाभिधायको भवतीति सुव्यक्तम्। उक्तविषये ब्राह्मणादिग्रन्थोद्धरणेषु-"दूरोहणं रोहति तस्योक्तं ब्राह्मणम्"[xxxvi] "यदगौरवीतं तस्योक्तंब्राह्मणम्"[xxxvii] "यद्वाकोपवाक्यं ब्राह्मणं तदेवैतेनाप्नुवन्ति"[xxxviii]"षष्टिश्च ह वै त्रीणि शतानि संवत्सरस्याहोरात्रे इति च ब्राह्मणं समासेन"सप्त च वै शतानि बिंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणं विभागेन विभागेन"[xxxix] उपर्युक्तस्थलेषु ब्राह्मणशब्दःनपुंसकलिंगे प्रयुक्तो दृश्यते, किन्तु विष्णुधर्मोत्तर, तथा महाभारतादि ग्रन्थे उभयोर्लिङ्गयोःप्रयोगः समुपलभ्यंते। मन्त्राःस ब्राह्मणाःप्रोक्तास्तदर्थं ब्राह्मणंस्मृतम्।कल्पना च तथा कल्पाःकल्पश्च ब्राह्मणस्तथा"[xl] अत्र उभयलिंगे विहितास्ति,परन्तु "य इमे ब्राह्मणाःप्रोक्ता  मन्त्रा वै प्रोक्षणे गवाम्।एते प्रमाणं भवत उताहो नेति वासवअत्र महाभारते पुंल्लिगे एव।

मीमांसा कोषे- ब्राह्मणम् इति शब्दःविधीनामर्थवादानां च समानः।तद्धि तेषां ब्राह्मणं येन विधीयन्ते"[xli] पाराशरीयकारिकायाम्-"ब्राह्मणं नाम मन्त्राणां व्याख्यानग्रन्थः"[xlii] सायणाचार्यस्तु-ब्राह्मणं विद्यायकं च स्तवकं च कर्मणाम्।मन्त्र तात्पर्यप्रकाशको ब्राह्मण भागः[xliii] मैत्रायणीसंहितायां-"विधिनिषेधार्थवादादि विभेदैर्भन्त्र लिङ्गादिप्रदर्शितार्थस्य विनियोग प्रतिपादको व्याख्यानोपव्याख्यानभूतःछन्दोविरहितो गद्यसदृशो वाक्यकदम्बकोSपरो वेद विभागः ब्राह्मणराशिः[xliv]एवं तु शतपथब्राह्मणभूमिकायामभिनिहितं जायते।

ब्राह्मणस्यापि लक्षणं न तावद् उपलभ्यते येन निर्धारितरूपेण संज्ञानं भवेत्।उक्तविषये ऋग्वेदभाष्यभूमिकायां जैमिनी वचनमनुसृत्य सायणेन कथ्यते-"नास्त्येतद् ब्राह्मणेत्यत्र लक्षणं विद्यतेSथवा नास्तीयन्तो वेदभागा इति क्लृप्तेरभावतः"मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः।अन्यद् ब्राह्मण मित्येतद् भवेद् ब्राह्मणलक्षणम्"[xlv]परन्तु ऋग्भाष्यभूमिकायां सायणः"मन्त्रव्याख्यानरूपो ब्राह्मणगतःशब्दो विधिशब्दःइति उच्यते"[xlvi]अत्रैवागे-"द्विविधं ब्राह्मणम्-विधिरर्थवादश्च।तथा च आपस्तम्बः-"कर्मचोदना ब्राह्मणानि ब्राह्मणशेषोSर्थवादः। अत्र का नाम विधिःकश्च अर्थावादःप्रस्तुतविषयमुपस्थापयामि- विधेर्विधानन्तु अर्थसंग्रहे सविस्तृतमुपलभ्यते,तत्र विधेर्विभाजनं त्रिषुप्रकारेषु

वर्तते प्रथमविभागे- 1-गुणविशिष्टविधी, द्वितीय विभागे-2-उत्पत्तिविनियोगाधिकारप्रयोगविधयः, तृतीयविभागे 3-अपूर्वनियमपरिसंरव्याविधयः।विधिर्नाम तु तस्य वर्तते यत्र लौकिक प्रमाणेन न संज्ञायते पदार्थान् अर्थात् प्रधानक्रिया अङ्गक्रिया द्रव्य,क्रम अधिकारादीनां विषयाणां संज्ञानं न जायन्ते तेषां संज्ञानं यया भवति सा विधिरूपेण शास्त्रे व्यवहृतोऽस्ति ।विषये लौगाक्षिभास्करेणार्थसंग्रहे-''तत्राज्ञातार्थज्ञापको वेदभागो विधिः।स च तादृशप्रयोजनवदर्थं विधानेनार्थवान् यादृशं चार्थं प्रमाणान्तरेणा प्राप्तं विद्यते।यथा अग्निहोत्रं जुहुयात् स्वर्गकामः''इति विधिर्नामान्तरेणा प्राप्तं स्वर्गप्रयोजनवद्धोमं विद्यते''[xlvii]

गुणविधि-यस्मिन्विधौ क्रियायाःविधानं न कृत्वा क्रियायाःअंगस्य विधानं भवति सःगुणविधिःयथा दघ्ना जुहोतीत्यत्र दघ्ना होमं भावयेत्

विशिष्टविधि-इमं विधिं गुणविशिष्टविधि एवं गुणविशिष्टकर्म विधितया गदनं भवति अस्य लक्षणे अर्थसंग्रहे -''यत्र तूभयप्राप्तं तत्र विशिष्टं विद्यते। यथा सोमेन यजेत''इत्यत्र सोमयागयोप्राप्तत्वात् सोमविशिष्टयागविज्ञानम् ।सोमपदे मत्वर्थलक्षणया सोमवता यागेनिष्टं भावयेदिति वाक्यार्थ बोधः''[xlviii]

उत्पत्तिविधिः- येषां संज्ञानं नान्य प्रमाणैः भवन्ति तादृंशि कर्माणि अनेन विधिना विधीयंते -''कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः।यथा ''अग्निहोत्रं जुहोति इति अत्र च विधौकर्मणःकरणत्वेनान्वयः''अग्निहोत्रहोमेनेष्टं भावयेत [xlix]
विनियोगविधि-अनेन अंङ्गयङ्गयोर्मध्ये संभवन् अंङ्गागिभावरूपस्य सम्बन्धस्य ज्ञानं कारयति ।अनेन विधिना विदितं जायते यत् कःकस्य अगःअंगी च।''अंगप्रधानसम्वन्ध बोधको विधिर्विनियोगविधिः''यथा दध्ना जुहोति इति। स हि तृतीयया प्रतिपन्नाङ्ग भावस्य दध्नो होमसम्बन्धं विद्यते''दध्ना होमं भावयेत इति।

**गुणविधौ- तु धात्वर्थस्य साध्यत्वेनान्वयः।**

क्वचिदाश्रयत्वेनापि''[l] विनियोग विधिःषडभिःप्रमाणैः सहयोगैः अंङ्गाङ्गीभावं बोधयति तानि प्रमाणानि अधो उल्लिरव्यते-'' श्रुति,लिङ्ग,वाक्य,प्रकरण,स्थान,समाख्यारूपाणि''।

श्रुति -प्रमाणान्तरं यत्र नापेक्षणीयं तत् श्रुतिप्रमाणम् ''तत्र निरपेक्षे रवःश्रुतिःसा च त्रिविधा-विधात्री अभिधात्री विनियोक्त्री च।तत्राद्या लिंगाद्यात्मिका द्वितीया व्रीह्यादिश्रुतिःयस्य च शब्दस्य श्रवणादेव सम्वन्धःप्रतीयते सा विनियोक्त्री [li] विधात्री-विधानकर्त्री अभिधात्री-अभिधानकर्त्री,या अभिधया स्वार्थं प्रतिपादयति इति सा अभिधात्री।विनियोक्त्री-विनियोगकर्त्री यस्य शब्दस्य श्रवणादेव सम्बन्धःप्रतीयते सा विनियोक्त्री,इयं विनियोक्त्री त्रिविधा-विभक्तिरूपा,एकाभिधानरूपा एकपदरूपा चेति''[lii] विभक्तिरूपा तृतीयाश्रुत्या-''व्रीहिभिर्यजेत'' अरुणया पिंगाक्ष्या एकहायन्या सोमं क्रीणातीति द्वितीयाश्रुत्या-''व्रीहीन् प्रोक्षति ''इमामगृभ्णन् रशनामृतस्य ''इत्यश्वभिधानीमादत्ते, सप्तमीश्रुत्या ''यदाहवनीये जुहोति एवमन्योऽपि विभक्तिश्रुत्या विनियोगो ज्ञेयः[liii]। एकाभिधानरूपा एकपदरूपा पशुना यजेत् '' इत्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वम्। ''यजेत'' इत्याख्याताभिहितसहाख्यया भावनाङ्गत्वं समानाभिधानश्रुतेरेव। एकपदश्रुत्या च यागाङ्गत्वम्''[liv]।यथा''पशुना यजेत''इत्यस्मिन् विधिवाक्ये पशु -टा इत्यनेन समानाभिधान श्रुतिना ज्ञायते टा इति एकवचन विभक्तिःतथा पुंस्त्वम् उभयोःकारकःपश्वङ्गः।अनेनैव प्रकारेण''यजेत''इति पदे यज तथा त उभावनुसृत्य भावनया त इति एकत्व विशिष्ट वाचकःतथा भावनायाःअंगम् तथा यजेत अस्मिन् रूपे पदश्रुतिना अयं निर्धारितो जायते संख्या एकत्व वाचकःयागाङ्गम् इति। श्रुत्यादिषु षटसु प्रमाणेषु परं प्रति पूर्वं वलवान् भवति।लिंगेन विनियोगावगमने चतुर्णां व्यापाराणाम् आवश्यकता दरीदृश्यते-''स्वा-भिधेयार्थप्रतिपादन-मन्त्रगतपदाभिधेयस्यार्थगमनम् वस्तुप्रकाशनसामर्थ्यनिरुपणम्-मन्त्रबोधानन्तरं शब्दशक्त्या संज्ञानम्।अंगानि बोधकश्रुतिकल्पना-मन्त्रोऽयं सोमपरकःइत्थं बोधानन्तरं अनेन मन्त्रेण सोममुपस्थापयति अर्थात्

उपस्थापनं करोति विनियोग-उक्तश्रुतेःकल्पनानन्तरं सोममन्त्रेण सोममुपतिष्ठेत इत्थं रूपेण विनियोगमापद्यते यस्याभिप्रायःअयमेव यत् सोमस्यायं मन्त्रःसोमोपस्थानस्याङ्गम्।

लिंग- शब्दानामभिधाशक्तेन लिङ्गम्-"शब्दसामर्थ्यं लिंगम्।यथाहुःसामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते।[lv] सर्वेषु शब्देषु तिष्ठत्सु सामर्थम् लिङ्गमारव्यायते ।अत्र एव समारव्यायाःइदं लिंगम् अन्यःयतो हि लिंगस्तु यौगिक वाचकायाःसमाख्यारुढयात्मकं लिंगमन्यदेव।अत्र एव "बर्हिर्देवसदनं सीदामि "मन्त्रे कुशलवनं क्रियायाःअङ्गम् न च उपल आदिनांतृणानां खण्डनम् इति।

वाक्य-समभिव्याहारो वाक्यम् । समभिव्याहारश्च साध्यत्वादि वाचकः द्वितीयाद्यभावेऽपि वस्तुतःशेषशेषि वाचकपदयोःसहोच्चारणम्"[lvi] यथा "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं श्रृणोति"अङ्गत्वंस्य ख्यापनकर्त्रे द्वितीयादि विभक्तीनामभावे अङ्गाङ्गीभावयोःवोधयितुं पदानां सहोच्चारणं वाक्यशब्देन व्यवहरति।उदाहरणे जुहू शब्देन द्वयोःअर्थयोःज्ञानं जायते पात्रविशेषःतथा हवनकर्मणे उपयोगि पात्रम्।वाक्यस्य भावार्थज्ञानाय वाक्यगतात्मक पारिभाषिक शब्दानामर्थावबोधनमावश्यकमस्ति ते च "अनारभ्याधीत,प्रकृति विकृति,चोदक रूपेण शास्त्रे व्यवहृतो भवन्ति अनारभ्य विधि यस्मिन् यागे विवरणतःप्रारभ्य तस्मिन् विवरणान्तर्गते यागार्थमपेक्षितं विधिवाक्यं आरभ्यविधिनाम्ना ज्ञायते ।अस्य अपरन्नाम विशेषविधिरपि। अस्य विपरीततया सःविधिःयो यागविशेषविवेचनादारभ्य तस्मिन् यज्ञ प्रसंगे न अपाठि अपितु सर्वेषु यज्ञेषु समानरूपेण प्रवृत्ताःविधयःअनारभ्य विधिनाम्ना शास्त्रे व्यवहरति यस्यापरनाम सामान्यविधिरपि।प्रकृतितस्य नाम यत्र सांगसहितसम्पूर्णसम्पादनमापादितं वर्तते यत्र न तावत् अन्यप्रकरणस्यापेक्षा भवति ।विकृति -यत्र सांगसहितसम्पूर्णसम्पादनमापादितं न सति अन्यप्रकरणस्यापेक्षया सम्पादनं जायते स तु विकृति रूपेण बोध्यते।चोदक- प्रकृतिवद् विकृतिःकर्तव्या"इदं बाक्यं चोदकरूपेण गृह्यते शास्त्रे ।यथा प्रयाजादिषु।"समिधो यजति"इत्यादिवाक्ये फलविशेषस्यनिर्देशात्"[lvii] ।

प्रकरणम्-- द्वयोःवाक्ययोःपरस्पराकाङ्क्षा प्रकरणरूपेण शास्त्रे ज्ञायते।यथा"समिधो यजति"अत्र समिद्यागेन भावयेत् परन्तु किं भावयेत फलाकांक्षायां "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत्"विधेः"दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्"वाक्यार्थबोधे सति कथं भावयेत इत्थमुपकारकस्याकांक्षा भवति अत एव एवं स्थितौ उभयाकांक्षारूपप्रकरणप्रमाणेन प्रयाजादयःदर्शपूर्ण-मासस्याङ्गम् वुध्यते।तच्चप्रकरणं द्वैविध्यं वर्तते-महाप्रकरणम् अवान्तरप्रकरणञ्चेति ।तत्र महाप्रकरणम्- मुरव्य भावनासम्बन्धिप्रकरणं महाप्रकरण्।तेन च प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम्" [lviii] यस्य प्रकरणस्य सम्बन्धःमुख्यभावनायाःअर्थात् फलभावनायाःजायते तत् प्रकरणं महाप्रकरणरूपेण ज्ञायते।मुरव्यभावनासम्बन्धि शब्दस्य व्याख्यानं अर्थबोधिनीटीकायां वर्तते-"मुख्यभावना इति मुख्यभावनासम्बन्धि-प्रकरणम्।अवान्तर प्रकरणम्-"अङ्गभावनासम्बन्धिप्रकरणमवान्तर-प्रकरणम् तेन चाभिक्रमणादीनां प्रयाजाद्यङ्गत्वम्" [lix] अङ्गभावनया सम्बन्धितं प्रकरणमवान्तर प्रकरणमुच्यते।"तदिदं प्रकरणं क्रियाया एव साक्षाद्विनियोजकं द्रव्यगुणयोस्तु तदद्वारा"[lx]।

स्थानम्- देशसामान्यं स्थानम्।तद्विविधं पाठसादेश्यम् अनुष्ठानसादेश्यं चेति स्थानं क्रमश्चेत्यनर्थान्तरम्।पाठसादेश्यमपि द्विविधम्-यथासंरव्यपाठःसन्निधिपाठश्चेति[lxi] अत्र यथासंरव्यपाठिन येन रूपेणोल्लिखितं वर्तते तेनैव रूपेण पाठम् कर्तव्यम् सन्निधिपाठेन्- "वैकृताङ्गानां प्राकृताङ्गानुवादिनं विहितानां सन्दंशपतितानां विकृत्यर्थत्वं सन्निधिपाठात्"[lxii] अनुष्ठानसादेश्यम् अनुष्ठानसादेश्याद् विनियोगःयथाऔपवसथ्येऽहनि अग्निषोमीय पशु सौत्येऽहनि सवनीयपशु अवभृथेऽहनि अनुवन्ध्य पशु पशुयागविषयसंन्देहेऽनेनेन निधार्यते यतो मैव सन्देहः।

समारव्या''- समारव्या यौगिकःशब्दःसा च द्विविधा वैदिकी लौकिकी च। तत्र होतृचमसभक्षणाङ्गत्वम् होतृचमस इति वैदिक्यया समारव्या।अध्वर्योस्तत्तत्पदार्थाङ्गत्वम्,लौकिक्या आध्वर्यवमिति समाख्या''[lxiii] एभिःश्रुत्यादिभिःषड्प्रमाणैःसहायतां प्रासिंकृत्वा ''समिदादिभिरुपकृत्य दर्शपूर्णमासाभ्यां यजेत (समिदादि यागेनोपकृतःदर्श तथापूर्णमास नामकोयागःअनेनानुष्ठानेनेष्टस्य सम्पादनीयः) इत्थं विनियोगविधिना अंगद्वयस्य विनियोजितं जायते तानि सिद्धरूपाणि क्रियारूपाणि अनयोःजातिद्रव्य संख्यादयःसिद्धरूपाङ्गम्,एषु प्रयोजनं प्रत्यक्षमेव तिष्ठति।क्रियारूपाणि द्वयोःयागयोःविभाजितौ स्तः गुणकर्म तथा प्रधानकर्म च। अनयोःगुणकर्म-सन्निपत्योपकारकम् तथा प्रधानकर्म-आरादुपकारकम् कर्म रूपेण व्यवह्रियते।सन्निपत्योपकारकन्तु कर्मणःअंगभूत द्रव्यादिमुद्देश्येन विहितम् कर्म।यथा अवघातप्रोक्षणादि ।पुनःसन्निपत्योपकारककर्मण्योःभेदत्रयं विद्यन्ते-दृष्टार्थम् अदृष्टार्थम् दृष्टादृष्टार्थम् चेति।एषु दृष्टार्थककर्मणःउदाहरणम्- अवघातादयःअदृष्टार्थक कर्मणःउदाहरणं यथा-प्रोक्षणादयःदृष्टादृष्टार्थ कर्मणःउदाहरणम्- पशु एवं पुरोडाशोऽस्ति ।सन्निपत्योपकारकस्य भेदमापादितम् अस्य अपरेण''आश्रयिकर्म''अपि कथ्यते मनीषिभिः।आरादुपकारककर्मन्तु द्रव्याद्यनुदिदश्य केवलं विधीयमानं कर्म ''आरादुपकारकम्।यथा प्रयाजादि''[lxiv] प्रयोगविधि- येन विधिना अनुष्ठानस्य आशुबोधो जायते स प्रयोगविधिः। प्रयोगविधौ अंगवाक्येभ्यः मिलित्यैकवाक्यतारूपे अवस्थानमुत्पत्तिर्विधिः। अस्य एव -''प्रयोगप्राशुभावबोधको विधिःप्रयोगविधिः।स चाङ्गवाक्यैकवाक्यतापन्नःप्रधानविधिरेव''[lxv] ।प्रयोगविधिना इमं विषयं निर्णीयते यत् कस्यांगक्रियायारनन्तरं अविलम्वेनाव्यवहितं भावेन अङ्गकियायाःअनुष्ठानं भवेत्। अत एव अंगक्रियायाःक्रमवोधकोऽयं विधिःप्रयोगविधिः अतःप्रयोगविधिरेव स्वाविधेयप्राशुभावसिद्धयर्थं नियतं क्रममपि पदार्थविशेषणतया विद्यते । क्रियया सार्द्धं क्रम विधानमपि स्वीकृते सति विधेयःद्वौ भवतः-क्रिया तथा क्रम।क्रमाणां निर्णयार्थं षड् प्रमाणानि भवन्ति श्रुति अर्थ पाठ स्थान मुरव्य तथा प्रवृत्ति ।अत एव मीमांसार्थकौमुद्यां''तन्नियमे च षट् प्रमाणानि श्रुत्यादीनि भवन्तीति''।तत्र श्रुत्यादीनां षड्प्रमाणानां संक्षेपेणोल्लिरव्यते-

श्रुतिः-''तत्र क्रमपरवचनं श्रुतिः।तच्च द्विविधम्-केवलक्रमपरं तद्विशिष्टपदार्थपरं चेति।तत्र ''वेदं कृत्वा वेदिं करोति इति केवल क्रमपरं वेदिकरणादेर्वचनान्तरप्राप्तत्वात्।वषटकर्तुः प्रथमभक्षः'' इति तु क्रमविशिष्टपदार्थपरम् एकप्रसरताभङ्गभयेन भक्षानुवादेन क्रममात्रस्य विधातुमशक्यत्वात्''[lxvi]।

अर्थ-यत्र प्रयोजनवशादनुमीयते क्रमनिर्णयःसोऽर्थक्रमःयथा-''अग्निहोत्रं जुहोति''यवागूं पचति अत्र विधिवाक्ये प्रथमोल्लेखः अग्निहोत्रस्य किन्तु अनुष्ठानक्रमे यवागु इत्यस्य प्रयोगःप्रथमतया स्वीकारात् अर्थ क्रमरूपेण यवागु इत्यस्यैव ग्रहणमिति निर्धार्यते।पाठ-पदार्थान् विधीयवाक्यानां क्रमःपाठक्रमेणोऽवसेयः।

पाठ क्रमद्वयोःभागयोःविभाजितौ स्तः। मन्त्रापाठःतथा ब्राह्मणपाठश्च। स्थानक्रममुपस्थितिःस्थान शब्देनाख्यायते। उपस्थितेरर्थःप्रकृतियागे आनुष्ठिक्रममनुसृत्य विकृतियागे उपस्थितिः।

मुरव्यक्रमःप्रधानक्रियायाःक्रमानुसाराम्।अङ्गक्रियायाःक्रमःमुरव्यक्रमरूपेणाख्यायते।प्रवृतिक्रमः''सहप्रयुज्यमानेषु प्रधानेषु सन्निपातिमङ्गानामावृत्त्यानुष्ठाने कर्त्तव्ये द्वितीयादि पदार्थानां प्रथमानुष्ठितपदार्थक्रमाद यःक्रमःस प्रवृत्तिक्रमः''[lxvii] अत्रापि श्रुत्यादिषु षट्सु प्रमाणेषु परं प्रति पूर्वं वलवान् भवति।

अधिकारविधिःयेन विधिना ज्ञायते यत् यागादि कर्मफलभाक् कःभवतिःअत एव कर्मजन्यफलस्वाम्यवोधकः अधिकारगतपदलक्षणे कर्मजन्यफलस्वाम्य शब्दार्थःकर्मजन्यफलभोक्तृताऽस्ति ।यथा यजेत स्वर्गकामःइति तृतीयविभागेन विधिस्तु-अपूर्वविधिःनियमविधिःपरिसंख्याविधिश्चेति।तत्र अपूर्वविधिःअपूर्वविधये भट्टपादेन विधिशब्दःप्रयुक्तः।विधिपूर्वविभागेन अयं विधिःउत्पत्तिविधि अथवा प्रधानविधिरूपेणारव्यायते।नियमविधिःअस्य विधेर्लक्षणक्रमे धनस्य प्रापको विधिःनियमविधिः[lxviii]अत्र भट्टपादेन तन्त्रवार्तिके गद्यते

**विधिरत्यन्तमप्राप्तौ नियमःपाक्षिके सति।**
**तत्र चान्यत्र च प्राप्तौ परिसंख्येतिगीयते।**[lxix]

अत्यन्ताप्राप्तपदार्थस्य बिधीयमानो विधिःअपूर्वविधिःपदार्थस्य पाक्षिके अप्राप्तौ अपि तद्विधायकं वाक्यं नियमविधिःतथा उभयो प्रवृत्तयोः स्थलयोःकस्य प्रवृत्तिनिवृत्तिविधि तद्विधायकं विधिःपरिसंख्येति गीयते।यथा क्रमम् उदाहरणं उपस्थाप्यते यजेत स्वर्गकामः"व्रीहीन् अवहन्ति पञ्च पञ्च नखा भक्ष्या इति ।परिसंख्या विधि-उभयोश्च युगपत् प्राप्तौ कस्य प्रवृत्तिनिवृत्तिर्वा परिसंख्याविधिना स्पष्टं भवति अयं विधिःद्विविधःश्रौती लाक्षणिकी। विषये लौगाक्षिभास्करेण -अत्र हि एव आवपन्ति इति श्रौति परिसंख्या।एव कारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभि धानात् ।पञ्च पञ्च नखा भक्ष्या इति तु लाक्षणिकी इतरनिवृत्तिवाचकपदाभावात् अत एवैषा त्रिदोषग्रस्ता।दोषत्रयं च श्रुतहानिरश्रुतकल्पना प्राप्तवाधश्चेति।तदुक्तम्-

"श्रुतार्थस्य ***परित्यागादश्रुतार्थप्रकल्पनात्।***
**प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदूषणा"इति ।**

अत्र संक्षेपेण विधिरित्यस्योल्लेखं कृतवान् । अनन्तरं अर्थवादस्य समीक्षणं करोमि विधिवाक्यैःविधेयपदार्थान् प्रशंसानिषेधवाक्ययोःप्रशंसनं निषेधञ्चार्थवादरूपेणान्वाख्याम् अर्थवादःइत्युच्यते।उच्यते मीमांसान्यायप्रकाशे- "विध्यादीनामध्ययनविध्युपात्तानां नानर्थक्य मेवमर्थवादानामपि तदुपात्तत्वेनानर्थक्यानुपपत्तेः स्वार्थप्रतिपादने च प्रयोजना भावाल्लक्षणस्या प्रयोजनवदर्थपर्यवसानं वक्तव्यम्"[lxx]अर्थवादस्य विभाजनं द्वयोःरूपयोःकृतौ स्तः"विधिशेष निषेधशेषस्तु प्रथम विभागे। तथा द्वितीय विभागे त्रिषु रूपेषु कृताःसन्तिःगुणवाद,अनुवाद,भूतार्थवादश्चेति।विधि शेष वायव्यं श्वेतमालभेत भूतिकामः"इत्यादिविधि शेषस्य वायुर्वै क्षेपिष्ठा देवता इत्यादेविधेयार्थप्राशत्यबोधकतयार्थवत्वम् ।निषेधशेष-बर्हिषिरजतं न देयम्"इत्यादिनिषेघशेषस्य सोऽरोदीत् यद् अरोदीत् तद रौद्रस्य रौद्रत्वम् इत्यादेर्निषेध्यस्य निन्दितत्वबोधकतयार्थवत्त्म्[lxxi] द्वितीय विभागे अर्थवादस्य त्रिविधस्य निरुपणमनया कारिकया जायते- "विरोधे गुणवादःस्यादनुवादोऽवधारितो।भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः"।

प्रमाणन्तरविरोधे सत्यार्थवादो गुणवादःयथा आदित्यो यूपःइत्यादि यूपा आदित्याभेदस्य प्रत्यक्षबाधितत्वादादित्यवदुज्जलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते।प्रमाणान्तरावगतार्थबोधकोऽर्थवादोऽनुवादः यथा अग्निर्हिमस्य भेषजम्"इति अत्र हिमविरोधित्वस्याग्नौ प्रत्यक्षावगतत्वात्।प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधकोऽर्थवादो भूतार्थवादःयथा-इन्द्रो वृत्राय वज्रमुदयच्छत्"इत्यादिः। सर्वसमीक्ष्यभगवता आपस्तम्वेन यज्ञपरिभाषायां सूत्रितम् कर्मचोदना ब्राह्मणानि ब्राह्मणशेषोऽर्थवादःनिन्दा प्रशंसा परकृति पुराकल्पश्च"[lxxii] अर्थात् शावरभाष्ये विधिविषयान्प्रति यदुल्लिखितं वर्तते-

हेतुनिर्वचनं निंदा प्रशंसा संशयो विधिः।
पराक्रिया पुराकल्पो व्यवधारणकल्पना।
उपमानं दशेते तु विधयो ब्राह्मणस्य तु।
एतद्वै सर्ववेदेषु नियतं विधिलक्षणम्"[lxxiii]।।

[i] (श0प0ब्रा0भू0पृ021)
[ii] (श0ब्रा02/5/2/23)
[iii]( श0ब्रा01/3/2/3/5)
[iv] (श0प0ब्रा01/1/1/10)
[v] (सश0प0ब्रा01/6/2/10)
[vi] (श0प0ब्रा01/1/4/9)
[vii] (श0प0ब्रा01/5/1/5)
[viii] (श0प0ब्रा013/5/4/2)
[ix]( श0प0ब्रा012/5/4/2)
[x] (श0प0ब्रा01/2/2/2/5/12)
[xi] (श0प0ब्रा01/2/3/2/5/9)
[xii] (श0प0ब्रा010/6/2/7)
[xiii] (श0प0ब्रा010/2/6/17)
[xiv] (श0प0ब्रा010/3/3/7)
[xv] (श0प0ब्रा01/2/5/7)
[xvi] (श0प010/5/4/1)
[xvii] (श0प0ब्रा013/6/1/1)
[xviii](श0प0ब्रा06/1/1/1)
[xix] (शु0य0सं02/5)
[xx] (श0प0ब्रा01/3/4/8)
[xxi](वृ.उ.2/4/10)
[xxii] (श0प0ब्रा01/6/3/8/1/1)
[xxiii] (श0प0ब्रा06/1/1/1)
[xxiv] (श0प0ब्रा013/4/3/10)
[xxv] (श0प0ब्रा014/6/10/3)
[xxvi] (श0प0ब्रा014/4/2/11)
[xxvii] (श0प0ब्रा014/4/2/28)
[xxviii] (श0प0ब्रा01/1/1/1/4)
[xxix] (श0प0ब्रा014/4/3/2)
[xxx]उणा0585)
[xxxi]श0प0ब्रा07।1।1।5)
[xxxii]अमर को0नानार्थवर्ग पृ04162लो0114)
[xxxiii]अमर0को0पृ082लो016)
[xxxiv]वाच04565)
[xxxv]अष्टा04।2।92)
[xxxvi]ऐ0ब्रा06।22)
[xxxvii]ऐ0ब्रा08।2)
[xxxviii]श0ब्रा04।6।9।20)
[xxxix] (निरु04।27)
[xl] (विष्णुधर्मोत्तर खं03अ07)
[xli] (पृ02989मी0को0)
[xlii] (पाराश0को0न्यास-3।1।35)
[xliii]( ऋग्वेद 1।146।46)
[xliv] (मैत्रा0सं0भू0पृ05)
[xlv] (ऋ0भा0भू0पृ065)
[xlvi] (ऋ0भा0भू0पृ032)
[xlvii] (अर्थ0सं045पृ0)

[xlviii]( अर्थ0सं0पृ047)
[xlix] (अर्थ0सं0पृ057)
[l] (अर्थ0सं0-पृ063)
[li] (अर्थ0र्स071पृ0)
[lii](अर्थ0सं0पृ073)
[liii] (अर्थ0सं0पृ079)
[liv] (अर्थ0सं0पृ081)
[lv] (अर्थ0सं0पृ092)
[lvi] (अर्थ0सं097)।
[lvii](अर्थ0सं0पृ0106)
[lviii] (अर्थ0सं0पृ0108)
[lix] अर्थ0सं0पृ0111)
[lx]( अर्थ0सं0पृ0116)
[lxi]. अर्थ0सं0120
[lxii] अर्थ0सं0पृ0123
[lxiii] अर्थ सं0पृ0129
[lxiv](अर्थ0सं0पृ0135)
[lxv] (अर्थ0सं0137पृ)
[lxvi] (अर्थ0सं0पृ0141)
[lxvii] (अर्थ0सं0पृ0167)
[lxviii] (अर्थ0सं0पृ0180)
[lxix] (तन्त्र वा01/2/34)
[lxx]( मीमां0न्याप्र0पृ0469)
[lxxi] (अर्थ0सं0पृ0247)
[lxxii] (आप0श्रौ0यज्ञप024/1/34-33)
[lxxiii] (शावर0भा02/1/8)